## मत्वर्थे मासतन्वोः । (१२८/३४७४)

यस्मिन्नर्थे मतुब् विहितः, तस्मिश्छन्दसि विषये यत् [1]प्रत्ययो भवति मासतन्वोः प्रत्ययार्थविशेषणयोः । प्रथमासमर्थाद् अस्त्युपाधिकात् षष्ठ्यर्थे सप्तम्यर्थे च यत्प्रत्ययो भवति । मत्वर्थीयानामपवादः । नभांसि विद्यन्ते यस्मिन् मासे नभस्यो (तै. सं. १.४.१४.१) मासः । 'सहस्यः' (तै.सं. १. ४. १४. १) । 'तपस्यः'(तै.सं.१.४.१४.१) । मधव्यः (तै. सं. ५.२.९.३) । नभःशब्दो[2]ऽभ्रेषु वर्तते । [3]तन्वां खल्वपि – ओजोऽस्यां विद्यते 'ओजस्या तनूः । रक्षस्या तनूः ' (मै.सं. २.३.१) । मासतन्वोः इति किम् ? [4]मधुमता पात्रेण [5]चरति । मासतन्वोरनन्तरार्थे वा (म.भा.२.३३४) । मध्वस्मिन्नस्ति मध्वस्मिन्न[6]नन्तरमिति वा मधव्यो मासः ।

[४९२] लुगकारेकाररेफाश्च[7] वक्तव्याः । (म.भा. २. ३३५)

लुक् तावत् – 'तपश्च तपस्यश्च' (तै.सं. १. ४. १४. १) । [8]'नभश्च नभस्यश्च' (तै. सं. १. ४. १४. १) । 'सहश्च सहस्यश्च' (तै.सं. १.४.१४. १) । नपुंसकलिङ्गं छान्दसत्वात् । अकारः – 'इषो मासः' (तै. सं. १. ४. १४. १) । '[9]ऊर्जो मासः' (तै. सं. १. ४. १४. १) । इकारः – 'शुचिर्मासः' (तै. सं. १. ४. १४. १) । रेफः – 'शुक्रो मासः' (तै. सं. १.४.१४. १) ॥

## मधोर्ञ च । (१२९/३४७५)

मधुशब्दान् मत्वर्थे[10] ञः प्रत्ययो भवति, चकाराद् यत् च । उपसङ्ख्यानाल् लुक् च । 'माधवः'[11] (तै. सं. १. ४. १४. १), 'मधव्यः' (तै. सं. ५. २. ९. ३), 'मधुः' (तै. सं. १. ४. १४. १) । तन्वां खल्वपि- [12]माधवा, मधव्या, मधुः तनूः ॥

## ओजसोऽहनि यत्खौ । (१३०/३४७६)

मत्वर्थे इत्येव । ओजःशब्दान् मत्वयर्थे यत्खौ[13] प्रत्ययौ भवतोऽहन्य[14]भिधेये । [15]ओजस्यमहः । [16]ओजसीनमहः ॥

## वेशोयशआदेर्भगाद् यल् । (१३१/३४७७)

मत्वर्थे इत्येव । वेशोयशसी [17]आदौ यस्य प्रातिपदिकस्य तस्माद् वेशोयशआदेर्भगान्तात् [18]प्रातिपदिकात् मत्वर्थे यल् प्रत्ययो भवति । लकारः स्वरार्थः । वेशोभगो विद्यते यस्य स वेशोभग्यः । [19]यशोभग्यः । वेशः इति बलमुच्यते । श्रीकामप्रयत्नमाहात्म्यवीर्ययशस्सु भगशब्दः । वेशश्चासौ भगश्च श्रीप्रभृतिर्वेशोभगः, [20]सोऽस्यास्ति इति वेशोभग्यः ॥

---

1. प्रत्ययो नास्ति फ. 2. मेघेषु ड. 3. तन्वां खल्वपि नास्ति फ, खल्वपि नास्ति ज. 4. यथा मधुमताऽः भरन् (तै. ब्रा. 2. 6. 11. 1). 5. चरन्ति ब. 6. अनन्तरे ड. 7. प्रत्ययाः इत्यधिकम् फ. ज. 8. नभश्च नास्ति ह. 9. ऊर्जो मासः नास्ति फ.ज. 10. मासतन्वोः इत्यधिकम् ड. 11. मासः इत्यधिकम् ड. 12. माधवी माधव्या ह. 13. इत्येतौ इत्यधिकम् ब. फ. ज. 14. इत्यभिधे फ. 15. अहन्योजस्ये (काठ.सं 22.14.38) 16. शुक्रे अहन्नोजसीने (मै. सं. 3.16.4.52). 17. आदिः ई. 18. प्रातिपदिकात् मत्वर्थे नास्ति फ. 19. यशोभग्यः नास्ति ड. 20. सोऽस्यास्ति नास्ति ड.